No. १३८१

Title न्याय कुसुमाञ्जलौ १य. ३य स्तवकौ.

Author म. म. वर्द्धमान.

Extent ८० Age ५.

Subject न्याय वैशेषिकम्

न्यायकुसुमाञ्जलिप्रकाशे द्वितीयतृती
यस्तवकौ

१२७१ 41
36
77

वर्द्धमानकृतकुसुमाञ्जलिव्याख्याने द्वितीयः स्तवकः

[redacted]

कु०व ॐ नमो भगवते वासुदेवासुदेवाय ।।।। श्रीगणेशाय नमः ।। ।। द्वितीयां विप्रतिपत्तिमुत्थापयितुं भूमिमारचयति । तदेवमिति । त
स्यज्ञत्वतया तत्कारणतया यागादिदर्शी । किंचिज्जीवी कर्त्तव्य इत्यर्थः । नवेति । यागादिस्वर्गसाधनत्वस्यातीन्द्रियत्वादित्यर्थः । तद्दर्शनाभावे दो
१ षमाह । नवेति । व्यवहारश्च यागादिस्वर्गसाधनताबोधकशब्दरूपो दृष्टाधिष्ठा । धिष्ठानरूपश्च । तदुभयमदृष्टसाक्षात्कारं विना न संभव
तीत्यस्मदादिविलक्षणः सर्वज्ञः कल्प्यत इत्यर्थः । वेदवाक्यजज्ञानस्य हि प्रामाण्यमनिश्चित्य वक्तुर्धनव्ययायाससाध्ये यागादौ प्रवृत्तिर्न स्या १
त् । प्रामाण्यं च गुणाजन्यं । गुणाश्च शब्दे ज्ञाने । प्रयोगहेतुवाक्यार्थयथार्थज्ञानवत्त्वमिति भावः । अन्यथासिद्धिमाह । नन्विति । वक्तृदोषेणा
प्रामाण्यशंकया निष्कंपप्रवृत्तिर्न स्यात् । सा च नित्यत्वादवक्तृके वेदे नास्तीति तत एव प्रामाण्यं किं वक्तृगुणेनेत्यर्थः । वक्तृगुणाजन्यत्वेऽप्यन्य
थासिद्धिमाह । योगेति । योगकर्म्मण्यां ये सिद्धाः सर्वज्ञाः स एव वेदकाराः । अदृष्टाधिष्ठातारश्चेति न नित्यसर्वज्ञसिद्धिरित्यर्थः । यद्यप्यन्य
थासिद्धिरपि प्रामाण्याभाव एव पर्यवस्यति । तथापि मानाभावमात्रम् । भावोऽग्रे दूष्यः । अन्यथासिद्धिस्त्वावश्यकेत्यर्थस्तेदः । प्रमामात्रेण गुणाज

७३

न्यत्वसिद्धौ शाब्दप्रमायामपि तज्जन्यत्वं सिध्यतीत्याशयेनाह । प्रमायाइति । अनित्यप्रमाया इत्यर्थः । ननु नित्यत्वाद्वेदानां कर्तृजन्यत्वेपि म
हाजनपरिग्रहात्प्रामाण्यं निश्चित्य यागादौ प्रवृत्तिः स्यादित्यत आह । सर्वेति । तथा च वेदे महाजनयोरनावाक्यस्यकेन परिग्रह इति लाक
द्वितीयामन्यथासिद्धिं दूषयति । तस्यापीति । अनित्यज्ञानत्वेन प्रमादिसंकाकलंकितत्वान्नित्यसर्वज्ञस्य सर्वकर्तृत्वान्न प्रकारान्तरसंभ
व इत्यर्थः । प्रामाण्यस्य गुणजन्यत्वं साधयति । प्रमेति । द्विविधीनत्वे विरोधाज्ज्ञानहेत्वधीनत्वे साध्यसिद्धसाधनं स्यात् । अतो ज्ञानहेतुव्य
तिरिक्तहेत्वधीनत्वं साध्यं । ननु प्रमाया ज्ञानत्वेन तद्धेतुजन्यत्वावश्यंभावाद् ज्ञानाजनकजन्यत्वे विरोधः । अप्रमायां तदसिद्धेर्दृष्टान्तासिद्धिः ।
व्यर्थविशेष्यत्वं वा घटादावपि साध्यसत्त्वेन कार्यत्वस्यैव व्याप्यत्वात् । यथार्थविशेषणवैयर्थ्यं च । यावत्पर्श्वज्ञानस्य परं प्रत्यसिद्धेः । नापि ज्ञा
नसामान्यहेतुत्वमुपहेतुजन्येति साध्यं उक्तदोषात् । ज्ञानसामान्यं तत्त्वं ज्ञानत्वं वा सर्वज्ञानमयत्वनयो वा । आद्ये दृष्टान्तासिद्धः । अन्त्ये इन्द्रियादिभिः
सिद्धसाधनं । नापि ज्ञानत्वावच्छिन्नकार्यत्वव्यापककार्यत्वप्रतियोगिककारणजन्येति साध्यं । ज्ञानत्वस्य नित्यवृत्तितया कार्यत्वानवच्छेद

कु॰व कत्वात्। जन्यत्वे तज्ज्ञानविशेष्यतोपस्थित्यात्मकज्ञानविशेषजनकैरिन्द्रियादिभिः सिद्धसाधनं। अत एव प्रमात्वं ज्ञानत्वावच्छिन्नकार्यत्वनि-
रूपितकारणत्वनिरूपकारणताप्रतियोगिकार्यतावच्छेदकं। ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वात्। अप्रमात्ववदिति निरस्तं। प्रमात्वस्य नित्यानित्यवृत्ति-
त्वात्। अनित्यप्रमात्वं कार्यतावच्छेदकं। कार्यमात्रवृत्तिधर्मत्वात्। अप्रमात्ववदित्यपि नीलघटत्वोदाहरणेनैकान्तिकं। तत्र विशेषद्वयकारणामाव्य-
२ स्यासिद्धत्वात्। प्रमाप्रमाकार्ये विविच्यंतव यथैकजातीयसामग्रीव्यक्तिभेदाद्घटद्वयं जातं तद्वदेव ज्ञानसामग्रीव्यक्तिभेदादुपपन्नं वैजात्यमपि २
तुल्यसामग्रीजन्यत्वेपि यमजयोर्वैधर्म्यवत्स्यात्। न च प्रमात्वावच्छिन्नकार्यत्वं कथमननुगतहेतुकमिति वाच्यं। तत्कयुक्तयापातस्य कार्यतानवच्छे-
दकत्वात्। अनित्यप्रमाप्रमाप्रमोभयवृत्तेरनुमितित्वादेर्जन्यजन्यत्वात्। अप्रमावदिति चेन्न। कारणव्यक्तिभेदजन्यत्वेन सिद्धसाधनात्। अप्रमा-
यां तदसिद्धेः। न वा प्रमायां दोषाजन्यत्वात्तथा। दोषस्यापि भ्रमादेः संविषयप्रमायामपि हेतुत्वात्। अनित्यप्रमात्वविरोध्युत्पन्नप्रतिबंधकज-
न्या। अनित्यप्रमेत्यवत्वात्। यद्वा प्रमाप्रमाप्रमान्यतरप्रतिबंधकजन्या। प्रमाप्रमान्यतरत्वात्। अप्रमावदिति चेन्न प्रमाजनकासाधारणाव्य-

ङ्कि विशेषस्याप्रमाप्रतिबन्धकत्वं प्रमाजनकत्वं चेति सिद्धसाधनात्। अत्रास्मत्पितृचरणाः। एवमप्रमापि स्मृतः स्यात्। न परतः प्रमावदस्या
धारणाकारणादेव तदुत्पत्तौ दोषस्य तत्रापि हेतुत्वापत्तेः। यदि च ज्ञानसामग्र्यां सत्यां विशेषादर्शनादेर्दोषस्यान्वयव्यतिरेकानुविधानाद्दोषो हे
तुस्तर्हि विशेषदर्शनादेर्गुणस्यान्वयव्यतिरेकानुविधानात्प्रमायामपि गुणो हेतुरिति तुल्यं। अपि वायथार्थकार्यं यथार्थकार्यं विजातीयं। तन्न कारणवि
जातीयकारणजन्यं। यथा घटविजातीयः पटः। अन्यथा कार्यवैजात्यस्याकस्मिकत्वापत्तेः। घटज्ञानमपि कार्यं तद्विजातीयाकार्यका
रणाविजातीयकारणजन्यमिति न्यायनिबारः। एवं प्रागुक्तानुमानेष्वपि न सिद्धसाधनं। अनुगतस्य प्रमाहेतुजन्यत्वेनार्थधारणाच्च किम्भे
दस्याहेतुत्वात्। एवमनित्यप्रमात्वमनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणतानिरूपककारणताप्रतियोगिककार्यतावच्छेदकं। अ
नित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात्। अप्रमात्ववत्। इत्यनित्यप्रमायामप्रमायामनुगतहेतुसिद्धि[illegible]दीति। यद्यप्यप्रमायां प्र
मात्वाभावे प्रमाहत्तिज्ञानमात्रहेतुबाधीनत्वं व्यधिकरणं। तथापि प्रमात्वं यदि ज्ञानसामग्रीमात्रप्रयोज्यं स्यात्तदा स्यात्। अप्रमावृत्ति स्यात्। प्रमा

यत्रवाविशेषदर्शनमपि भ्रमः तत्र तदन्यज्ञानस्यापि भ्रमत्वान्न विशेषदर्शनं प्रमात्वप्रयोजकं । मैवम् । यद्विशेषदर्शनं हि भ्रमविरोधि तदभावोऽप्रमाहेतुः ५

कु॰ वद्द त्ववरित्यापादनीयं । अप्रमायाः प्रमित्यजनकत्वे अजन्यत्वात् । आपादकमसिद्धमित्याह । ज्ञानत्वेपीति । तर्हि प्रमात्वमपि न ज्ञानसामग्री प्र

योज्यं । अतिरिक्तदोषाभावापेक्षणादित्याह । [illegible]वं तर्हीति । मुक्तं चैतदेहे । अन्यथा प्रमासामग्र्यामधिकदोषानुप्रवेशादप्रमाप्रमाविशेषः स्या

२ त् । ज्ञानसामग्र्यामधिकाराणानुप्रवेशात्किंचिद्यथापादं विशेष एवेति भावः । अत एवेति । न चैवमप्रमित्यजनकत्वं चेपरतस्त्वं । आगन्तुकभाव

नपेक्ष्यज्ञानसामग्रीजन्यत्वमेव स्वतस्त्वमिति विवक्षितत्वात् । तथा च गुणाजन्यत्वेन प्रमायाः नेश्वरसिद्धिरिति भावः । [illegible]देवमिति । ननु पीतः शं २

३ खः इत्यत्र विशेषदर्शनेपि भ्रमाद्यनिवारणात् विशेषादर्शनं न भ्रमहेतुः । उत्पन्नभ्रमे च उत्पन्नं विशेषदर्शनं विरोधि । दिङ्मोहे गौरोहमिति भ्रमेव त

थादर्शनात् । तद्दोषत्वान्न त्वनाक्षि । प्रमारूपमेव विशेषदर्शनं गुणः इति तदभाव एव दोषः । ननु विशेषादर्शनं न दोषः । विशेषदर्शनप्रतिबंध

कपित्तादयो दोषाः आवश्यकत्वात् । न च तेषां नानात्वेन विशेषादर्शनप्रतिबंधकतयाऽनुगमः लाघवाद्विशेषादर्शनमेव दोषः तु इति वाच्यं । क्वचि

त्क्वचिद्दोषस्य त्वननुगमात् । अन्यथा पित्तादितोप्यप्रमा न स्यात् । अननुगमात् पित्ताद्युत्कर्षेणाप्रमोत्कर्षाच्च । पित्तादेर्दोषत्वेन विशेषाप्रमैव कु

बं२

न्न २

तो न प्रवर्तति । यदि च विशेषस्य विशेषान्तराभावात्तत्राऽनवस्था ॥ किंच । विशेषादर्शनं न प्रमामात्रे । न वा प्रत्यक्षप्रमायां हेतुः । व्यभिचारा
त् । तत्रापि तद्धेतुत्वेऽनवस्थानात् । नापि चैवं प्रमामात्रं प्रत्यक्षहेतुत्वेऽपि संशयविपर्ययोरन्यतरप्रमायां तस्य हेतुत्वात् । तत्र विशेषादर्शनस्य दोषत्वे नाप्यत्रापि त
थास्यात् । पित्ताद्यचकार्यस्यापि त्रयो विशेषादर्शनप्रतिबन्धकत्वेनान्यथासिद्धत्वात् ॥ ननु प्रत्यक्षप्रमा दोषगुणजन्यत्वेऽपि वेदे भ्रमाद्यभावपक्षत्वेऽयं प्र
प्रमा स्यात् । लोके भ्रमाद्यभावपक्ष एव प्रमोत्पत्तेः ॥ ननु वाक्यार्थयथार्थज्ञानवत्त्वादिर्गुणः ॥ इत्याद्य[illegible]तदिति । लिंगसादृश्यादि भ्रमरूपदोषाभाव
मात्रादनुमित्यादिप्रमेति लिंगसादृश्यादि यथार्थज्ञानमपि गुणः स्वहेतुरिति । शब्दप्रमायामपि दोषाभावे सति यथार्थज्ञानं गुणो हेतुरि
त्याह । [illegible]मानाद्याविति । ननु यथार्थवाक्यार्थज्ञानादेर्गुणत्वेऽपि करणापाटवाद्यसाध्यत्वनिश्चितं अन्यकृतं तत्र वाक्यं न प्रमाणं दोषाभा
वस्यानुप्रमाहेतुत्वे करणापाटवादेर्गुणत्वमिति तदप्रामाण्यमुपपद्यत इति शंकते । [illegible]यत्रेति । वक्तृदोषस्य स्यादपि भ्रान्तविप्रलम्भकवाक्ये संवाद
त्प्रामाण्यदर्शनाद्दोषाभावोऽपि नाप्रामाण्यप्रयोजकः ॥ तात्पर्यविषयत्वं प्रामाण्यमेवेति यदि प्रामाण्येऽपि तुल्यमेवेति परिहरति । [illegible] भाव

स्थिन्न ३ वाक्यार्थ ४

कु०व

इति। निःस्वभावत्वमिति वेदप्रामाण्यात् प्रामाण्यप्रयोजकगुणाद्दोषयोरभावादित्यर्थः। [illegible] आदिति। यथा प्रवृत्तौ द्वेषाभावहेतुकत्वेऽस
ति निवृत्तौ रागाभावहेतुकत्वे सत्युपेक्षाद्दोषाज्ञानादपि प्रवृत्तिनिवृत्ती स्यातामिति रागद्वेषयोः प्रवृत्तिनिवृत्तिहेतुत्वमिति। एकैकाभावान्य
४ थासिद्धः। तथा प्रमाप्रमयोरपि गुणदोषौ न तु दोषाभावगुणाभावा वित्यर्थः। ननु स्वतःगुणास्य प्रमाहेतुत्वेपि वेदस्यापौरुषेयत्वेन यथोक्तगुणा
भावाद्दोषाभावमात्रप्रयुक्तमेव प्रामाण्यमिति प्रामाण्ये गुणस्य व्यभिचारान्न हेतुत्वं किं तु दोषाभावस्यैवेत्याह। [illegible] पीति सिद्धिर्ज्ञप्तिः। सिद्धे ४
निखिला वेदाः प्रमाणं। आप्तेन वक्तृदोषाभावादित्यनुमानादित्यर्थः। अत्र वेदा न प्रमाणा आप्तेन वक्तृगुणाभावादिसत्यति ज्ञमाह। [illegible] ति। ज्ञानग्रा
हकादेव प्रमात्वं निश्चीयते। दोषाधीनाशङ्का। आप्तवक्तृकत्वादेव निरस्येत्याह। [illegible] एवेति। तथापि गुणाभावाद्धेतुकोऽप्रामाण्यसंशयस्त
दवस्थ एवेत्याह। [illegible] निवृत्तीति। [illegible] इति। दोषसहितगुणानिवृत्तेरेवाप्रमात्वहेतुत्वादित्यर्थः। [illegible] मेति। गुणासहितदोषनिवृत्तेरेव प्रमात्व
प्रयोजकत्वादित्यर्थः। ननु वेदापि शुकादिवाक्यवत् प्रकारकवाक्यवत् संवादिकत्वं प्रमाणं गुणाजन्यत्वात् धूमप्रमाद्वह्निमत्त्ववद्वक्तृ अनुमि

त२ ता१

तिर्वाचकत्वं प्रमाया यथार्थलिंगज्ञानाजन्यत्वात्। न च व्यंजकांतरमेव तद्विषयः प्रत्यभिज्ञानात्। गोत्वाद्येकव्यक्तिके तदभावात्॥ ॥ उच्यते। शु
कादिवाक्ये वेदे तु भ्रान्तिप्रतारकवाक्ये च प्रमाणाशङ्कनाज्ञोक्तत्वाद्वेदे वदीश्वरस्यैव यथार्थवाक्यार्थज्ञानं गुणो हेतुः तस्य कार्यमात्रे कर्तृत्व
त्। शुकादिवाक्ये वेदे तु उत्पत्तस्य दोषाभावादिनापि मतत्वात्। न चैवं शब्दाभासोच्छेदः तथास्याप्यीश्वरकर्तृकत्वादिति वाच्यं तद्वाक्या॥
र्थस्यासत्वेनेश्वरज्ञानाविषयत्वात्। एवं लिंगाभासजन्यप्रमायामपीश्वरस्यैव यथार्थलिंगज्ञानं गुणः। एवं प्रमायां गुणजन्यतया। शाब्दप्र
मायां अपि गुणजन्यत्वादेवं क्रांतरस्याभावात्तदाश्रयेश्वरसिद्धिरित्युक्तं। संप्रति प्रामाण्यग्रहोपि न स्वतः। अपि तु परत इति वैदिकप्रमायां अपि त
त्वं आप्तोक्तवाक्यजन्यत्वेन ग्राह्यमिति ततोपीश्वरः सिद्ध इत्याह। मिति। तत्र यद्यपि ज्ञानप्रामाण्यं ज्ञानग्राहकसामग्री ग्राह्यं न वेति न सं
शयः। परतःपक्षे विज्ञानस्यापि पक्षतया प्रमात्वानुमितेर्ज्ञानग्राहकग्राहकत्वात्। अप्रामाण्यस्यापि स्वतोग्राह्यत्वापत्तेश्च। तथापि नरज्ञानवि
षयकज्ञानाजन्यज्ञानग्राह्यं न वेति संशयः। स्वतःपक्षे प्रामाण्यवत एव ज्ञानस्य ग्रहात्परतःपक्षे ज्ञान एव ज्ञानेऽनुमित्या प्रामाण्यग्रहात्।

वं २

कु०व तत्र तेनैव तत्प्रामाण्यग्रह इति प्राभाकराः। ज्ञानस्यातीन्द्रियतया तदनुमित्यात्मक इति भाट्टाः। मनसैव ज्ञानवत्तत्प्रामाण्यग्रह इति मुरारिमि
श्राः। त्रितयसाधारणं च स्वतस्त्वं निरुक्तमेव। पूर्वपक्षस्तु। यद्यपि विशेष्यावृत्त्यप्रकारकत्वं अगृहीतया स्थितं वा। प्राभाकरपक्षे स्मृत्यन्यज्ञानत्वं वा॥
५ विशिष्टज्ञानत्वं वा। प्रामाण्यं नानुव्यवसायग्राह्यं विशेष्यतावच्छेदकज्ञानं विना विशिष्टज्ञानाभावात्। तथापि तद्वति तत्प्रकारकज्ञानत्वं प्रमाण्यं
ग्राह्यं निष्कम्पप्रवृत्त्यन्यथाभावात्। लाघवाच्च। तच्च ज्ञानग्राहकसामग्रीग्राह्यमेव। तथा हि। विशेष्यतद्धर्मवत्त्वं तत्प्रकारकत्वं व्यवसायस्या- ५
नुव्यवसाये न गृह्यते। ज्ञानस्य विषयनिरूप्यतया ज्ञानवित्तिवेद्यो विषय इति व्यवसायसमाने धर्मधर्मिवद्वैशिष्ट्यमपि विषयः। व्यवसा-
यस्य पुरस्त्वाविशेषतुल्यत्वात्। अत एव रजतत्वेन पुरोवर्त्तिनं जानामीति तदाकारः। अन्यथा पुरोवर्त्तिनं रजतं वा जानामीति तदाकारापत्तेः। अ-
प्रामाण्यं परतो ज्ञायते। तदभाववत्त्वस्यानुमानुल्लिखितत्वेनानुव्यवसायाविषयत्वात्। न चैवमनुव्यवसायस्यापि व्यवसायविषयविष-
यकत्वे प्रामाण्यांशे निश्चयं संकरः। बाधावतारदशायामिष्टत्वात्। तदनवतारे तस्यैव प्रतिबन्धकत्वादिति तत्त्वचिन्तामणिसिद्धान्तमाहुः। [illegible]मिति। अन

न्यासदशायामिति निगमयति द्विचारा ॥ थें । परतो ज्ञेयत्वस्य केवलत्वाद्व यित्वात् । ननु स्वस्याप्यन्यापेक्षयापरत्वाङ्गीकृतमते ज्ञानानु मितिग्राह्य
त्वात्सिद्धसाधनं । परतो ग्राह्यत्वेपि कदाचित्स्वतो ग्राह्यत्वाविरोधात् । अर्थेन व्यभिचारश्च । तस्य तज्ज्ञानग्राह्यस्य ज्ञानप्रामाण्यसंदेहेन संदि
ह्यमानत्वात् । न च ज्ञानत्वे न तद्धेतुर्विशेषणीयः । ज्ञानविषयज्ञानप्रामाण्यसंदेहसहितज्ञानरूपार्थसंदेहेपि तस्य निश्चितत्वेन तथापि व्य
भिचारात् ॥ ॥ [illegible] ॥ अनभ्यासदशापन्नज्ञानप्रामाण्यं । न ह्यत्र ग्राह्यं । तद्ग्राह्यग्राह्यं वा । स्वाश्रयेसत्यपि तदुत्तरवृत्तीयज्ज्ञाना द्वृत्तिसंशय
विषयत्वात् । प्रामाण्यसंशयाजन्यसंशयविषयविषयत्वाद्वा । अप्रामाण्यवत् । अर्थे निश्चितेपि न निश्चयानंतरवृत्तीया ज्ञाता अर्थसंश
यो न वा प्रामाण्यं संशयं विनेति नार्थेन व्यभिचारः । स्वाश्रयस्य संबंधिशब्दत्वेन समभिव्याहृतपरत्वाच्च न स्वस्य परत्वं । यद्वोक्तं । यावद्व्यवसा
यो ल्लिखितप्रकारविशिष्ट एव धर्म्यनुव्यवसायेन भासते । तत्र तथा हि । इदं रजतं वज्ञानामीति व्यवसायानुव्यवसायः ॥ वहिर्विशेष्यके मन
सा स्वातंत्र्यात् । किं चिदमिदं मिदं त्वेन रजतत्वेन जानामीति । तत्रेदंत्वरजतत्वे तत्प्रकारत्वेन तत्प्रकारकज्ञानवत्त्वं वास्य निभासते । अन्यथे

ष्टा र   क्षे   ना५

कु०व०घ्वि याप्रकारकत्वावच्छिन्नतीयार्थसंसर्गः। नवरजतत्ववैशिष्ट्यमेवद्वितीयार्थः। अव्यवसायोपितद्ध्वंसाव्यापन्नः। अतद्इदंद्वरजतत्ववैशिष्ट्यपुर
वर्त्तिनानानुव्यवसायविषयइतिकुतस्तत्प्रामाण्यग्रहः। ननुपरतःपक्षेपरस्परशङ्कोदरत्नावेनुमानंवाच्यं। नचलिंगाभावादसंप्रवि।
समर्थप्रवृत्तिजनकत्वंलिंगमितिवाच्यं। नकारणतावच्छेदकरूपग्रहंविनातद्ग्रहाशातघदिप्रमात्वमेवतदात्माश्रयः। अन्यथेवन्नतदवश्या
६ माराप्यलिंगमस्तु। उपजीव्यत्वात्। नचकृतौ तारनिश्चायेनअथवाव्यवकारणत्वंगृहीतत्वासमर्थप्रवृत्तिजनकत्वग्रहः। यात्स्कामावात्। न
वप्रत्यक्षेमेवतद्ग्रहः स्यात्। तद्धिनवहिरिंद्रियसंबन्धं। आन्तरत्वात्। नापिमानसं। तद्धिसमर्थप्रवृत्तेः। प्रागुत्तरकालंवा। वाद्यः। समर्थप्रवृत्तेत्तर ६
रभावान्नवैशिष्ट्यग्रहाशानात्। ज्ञानस्यनष्टत्वेनमनसाप्रत्यासत्यभावात्। नापितज्ज्ञानीयत्वंलिंगं। तद्धिनकरवरणावच्छिशरीरज्ञाना
त्वादितत्वकरवरणाघंततरवत्निकरवरणावच्छिन्नज्ञानेव्यभिचारः। तत्रापिशरीरांशेप्रमात्वमेवेतिचेत्। तर्हिकरवरणादीतिच्यर्थमाशरीर
त्वेमपिकस्यापिविच्छरीरव्यक्तेर्ज्ञानाजनकत्वप्रामाण्यापातात्। अन्यथाशरीरत्वस्यैवमानायोगात्। करवरणादिसम्बन्धेयच्छरीरत्वज्ञानंतद्या

रापनीतज्ञाने प्रमेयत्वाभिधेयत्वाभिवद्व्यस्तेतायद्वा पूर्वं पृथिवीज्ञाने पृथिवीत्वप्रकारकनिश्चयत्वानुव्यवसितो कदाचित्तत्रैवागं घस्यतद्धि ५
वृत्त्यर्थत्वादिति वेशनकरचरणादिमत्वमुपलक्षणं विशेषणं वा नाद्यः व्यावृत्त्युपलक्षणाभावात् नान्त्यः विषयतया हि ज्ञानविशेष
णं करचरणावच्छिन्नप्रकारकज्ञानविषयत्वस्य व्यभिचारात् अशरीरे पि तादृशभ्रमसंभवात् शरीरज्ञाने तदसिद्धेश्च विषयविशेषणत्वे च
रचरणावच्छिन्नयकशरीरज्ञानत्वस्य व्यभिचारात् शरीरत्वभ्रमस्यापि वस्तुतः करादिमद्विषयत्वात् न च करचरणाद्यवच्छिन्नशरीरत्वेन ज्ञानं न
वतीति विवक्षितं तृतीयार्थस्य विषयत्वे स्वरूपासिद्धेः शरीरज्ञानस्य तच्छून्यशरीरत्वादिविषयकत्वानियमात् ॥ आत्माङ्का ॥ समर्थप्रवृत्तिज
नकत्वं प्रवृत्त्युत्तरकालं संस्कारादिविरहस्य च साक्षात्कारे पुनः स्मृतिरूपपृथिवीज्ञाने सति तत्सन्निकर्षे न प्रत्यभिज्ञानइव विशेषणज्ञानजनि
तसंस्कारापेक्षणाम् मनसा गां पश्यत्येवायं निश्चय इत्याकरणात् सुरभि चंदनमिति वाह्यप्रज्ञानवद्ज्ञानजननात्स्मृत्यात्मकानामावाद्धेत्वसिद्धिः तज्जा
तीयत्वमपि करचरणावच्छिन्नशरीरत्वप्रकारकज्ञानत्वादिशरीरत्वभ्रमेव करचरणाचतो विशेषणत्वात् प्रथमं प्रामाण्ये नु मितिः केव
लव्यतिरेकिणाम् अनुप्रमाणप्रसिद्धिं विनाव्याप्त्यग्रहात्कथमनुमानं अथ व्याघातात्प्रमाणच्छि अपसिद्धो सामान्यतः साध्यप्रसिद्ध्या न तद
रूपनीतज्ञाने प्रमेयत्वाभिधेयत्वाभ्यां व्याप्तिवत्त्वग्रहात् यद्वा पूर्वं पृथिवीज्ञाने पृथिवीत्वप्रकारकनिश्चयत्वानुव्यवसितो कदाचित्तत्रैव गं घस्यतद्धि नो ४

कु०वृ०

सिद्धेः। विशिष्यानिर्णयाद्यनात्मयिष्याप्रामाण्यत्वेइतिचेत्। तर्हिकस्यापि प्रथमं ज्ञानार्थप्रामाण्यानुमितिर्नस्यात्। अप्रामाण्यनिश्चयस्य
स्यघरथ्याघातस्यतद्धेतूपस्थितेः। स्वयंप्रामाण्यनिषेधस्यवतद्वीमूर्वकत्वात्। मैवम्। प्राग्भवीयसंस्कारा द्विशेष्यावृत्त्यप्रकारकत्वं तद्वतिता
७ त्प्रकारकज्ञानत्वं वा प्रामाण्यं मंत्रं स्मृतं पृथिवीज्ञानादौ साध्यमानं सर्वं नाममहिम्नापन्नधर्मितावलात् पृथिवीज्ञानस्य विशेष्यावृत्त्यप्रकार
कत्वादौ पर्यवस्यति। स्वतः प्रामाण्यनिषेधे प्राथमिकप्रामाण्यज्ञानस्यान्यथोपपादयितुमशक्यत्वादिति सांप्रदायिकाः॥ ॥अस्मत्पि ७
तृचरणास्तु। प्रथममप्रामाण्याभावएवप्रामाण्यं व्यतिरेकिणा साध्यं तत एव निष्कंपप्रवृत्तेः। तदेव च सिद्धत्वपन्नधर्मितावलेन तद्वति तत्प्र
कारकज्ञानत्वादिकमादायसिध्यति। तथाहि। अयं पृथिवीत्वेनानुभवो न पृथिवीत्वाभाववनिपृथिवीत्वप्रकारकः। गंधवद्विषयकप्रवृ
त्तिजनकपृथिवीत्वप्रकारकनिश्चयत्वात्। यन्नैवं तन्नैवं। यथा पृथिवी भ्रमः। एवं च पृथिवीभ्रमपृथिवीत्वाभाववति पृथिवीत्वप्रकारक
त्वसमर्थप्रवृत्तिजनकत्वाभावयोर्व्याप्तिग्रहात् अप्रामाण्यव्यापकत्वे द्वैतभावाभावरूपाद्धेतोरप्रामाण्याभावरूपं साध्यं सिध्यति। यद्वा

पकतयास्वभावोऽरुह्यीत स्वदभाव एव द्विष्टेत्युनासाध्यते। यत्रस्वभावव्यापकतास्वभावस्यतायते। तत्रसाध्यप्रसिद्धिरनुमानांगं तेन विनातद्
ज्ञानाद् यत्रस्वभावव्यापकतास्वभावस्य तत्र न तेन विना पिव्यतिरेकव्याप्तिग्रहः। विशेषणाज्ञानं विना कथं प्रामाण्यविशिष्टानुमितिरितिवे
त्। प्रथमं न कथं। विशेषज्ञाने प्रामाण्यमित्यनुमित्यनंतरं तेनैव हेतुना तत्र प्रामाण्यविशिष्टानुमितिः। अभावविशेष्यकज्ञानानंतरमभाववद्भूत
लमितिज्ञानवत् एवं तद्भाववनितत्प्रकारकत्वव्यतिरेकासिद्धत्वात् द्वितितत्प्रकारकत्वमादायपक्षधर्मतावलेन सिध्यतीति तत्र चिंतामनावाङ्क्।
कदा विदपीति। प्रामाण्यग्रहो ज्ञानस्य कालमिव तत्पूर्वमपीत्यर्थः। न वज्ञानत्वसाधारणधर्मज्ञानमात्रात्संशयात्। नद्दीति। प्रामाण्यज्ञानमात्रं न विरो
धि। अपि तु प्रमाणमेवेत्यवधारणात्मकमिति शंकते ग्रथेति। निश्चयमात्रमेव संशयविरोधि न तु तद्विशेषावधारणमित्याशयेन परिहरति। त
क्ति मिति। प्रमाणेति। प्रमाणरूपं ज्ञानमित्यर्थः। तदप्रतीतेः। प्रामाण्याप्रतीतेरित्यर्थः। धर्मिणएवेति। ननु धर्मिज्ञानं न संशयहेतुः। कोटिस्मरण
विशेषादर्शनधर्मीन्द्रियसंनिकर्षात् प्रामाण्यसंशयस्य एव ज्ञाने यैदेव धर्मिज्ञायते। तत्रैव विशेष्य उपपद्यते। अन्यत्र विशिष्टज्ञाने विशेष्यज्ञान

ग्रह

कु॰ व॰ ई॰ स्याद्धेतुश्चायं। अग्राह्येति। उरगादौ वेगेन गच्छतः स्पष्टं द्विषयेन्द्रियसन्निकर्षेऽपि यावद्विषयज्ञानेऽपयद्देवधर्मिज्ञायते। तत्रैव विशेषादर्शनादिति। संशयो ज्ञा
यते। तद्वज्ञाते धर्मिणि तन्निष्ठधर्मिज्ञानं हेतुः। किञ्चायं धर्मिगतसाधारणधर्मस्यैव तेन सहदृश्यः सहचारावसायस्तत्रो कटको किन्तासंशयस्य धर्मिज्ञा
नमपि हेतुत्वेन स्याच्चायं यदपीति। प्रामाण्यस्यानुमेयत्वे लिंगपरामर्शापेक्षया विलम्बः स्यादित्यर्थः। तथा चार्थापत्त्या परतस्त्वसाधनं प्रतिरुद्धमिति भावः।
८ अन्यथैवेति। प्रवृत्तिमात्रे प्रामाण्यग्रहो न हेतुः। अर्थसंदेहादपि प्रवृत्तेरन्यथोपपन्नेरित्यर्थः। उपयोगवतीति। झटित्यभ्यासापन्नलिंगानुसंधानादप्यु ८
पपन्नेरित्यर्थः। परमतमपि च निवारमाह। नहीति। न च विलम्बइत्यपि लिंगानपेक्षता। तथासति पिपासोपशमशक्त्यनुभवस्याप्यलैंगिकत्वप्रसंगाद्
त्यर्थः। सर्वमेतदिति। झटितिप्रवृत्त्यादिकमित्यर्थः। तद्वेति। यद्यगृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यनिश्चायकं स्यात्तदेयं। तस्य व्यवसायो ऽगृही १२
तप्रामाण्य एव विषयं निश्चाययन्तु। किन्तु प्रामाण्यग्रहेऽप्यदि वतस्य प्रामाण्यसंशयात् ततन्मात्रात् दृष्टे निश्चयः तद्धि प्रामाण्यानुमितरप्यप्रा
माण्यसंशयान्नततोऽपि प्रामाण्यनिश्चयः। ततस्तस्याऽपि प्रामाण्यनिश्चयावश्यकत्वेऽनवस्था। एवं लिंगव्याप्त्यादिज्ञानानामपि प्रामाण्यानि

श्चये हेत्वाद्यसिद्धिस्तन्निश्चये चानवस्थानात् लिंगादिज्ञाने प्रामाण्यसंशये ऽनुमत्वविरोधात्। तथा च परिशेषात्स्वतःप्रामाण्यग्रह इत्यर्थः।
न्तद्ग्रह इत्यपीति। न प्रामाण्यनिश्चयादेवार्थनिश्चयः किं तु न यत्राप्रामाण्यशंकाकरत्वादिज्ञाने तत्र व्यवसायपदार्थे निश्चय इति तत एव निष्कं-
पप्रवृत्त्युपपत्तिरिति न प्रामाण्यानुमितिलिंगादिज्ञानानामपि प्रामाण्यानुसरणमिति नानवस्थेत्यर्थः। तथाप्यनभ्यासदशापन्नज्ञाने प्रामाण्यसं-
शये नार्थनिश्चयस्य परिशेषात्तत्प्रामाण्यानुसरणेऽनवस्थेत्यत आह। नवेति। अगृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यं निश्चाययति अप्रामाण्य-
शंकाकलंकाभावात्। यत्र प्रामाण्यज्ञानेऽप्यप्रामाण्यशंकया प्रामाण्यसंशयः तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः। प-
र्यावरप्रामाण्यशंकं तज्ज्ञानप्रामाण्यनिश्चयादेव तन्निश्चयः। न चैवमनवस्था उत्तरप्रामाण्यज्ञानस्य ज्ञानाभावात् धर्मिज्ञानाभावेन कोटिस्मा-
रणाभावात् क्वचिद्याथार्थ्यसंवादाद्वा प्रामाण्यसंशयानवकाशान्नावाप्तिरित्यर्थः। अथेति। नाद्यानां प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वे तस्या अपि प्रामाण्या-
नुसरणेऽनवस्था। प्राभाकराणामपि प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यं स्वरूपप्रामाण्यान्यत्वादिति। परग्राह्यत्वेऽनवस्थानात्। परिशेषानुमानेन

श्र.२

कु॰वर्द्ध॰ मानान्तरेणाग्रा ह्यं तथा च तत्प्रामाण्यस्य ग्रहणाग्रहव्यवस्थयेनेत्यनवस्थया विषयान्तरसंचारो न स्यादित्यर्थः। कारणामुखीमनवस्थामाह· लिंग
मिति· प्रामाण्यसंशये न लिंगस्य संदिग्धत्वान्न निश्चय इत्यर्थः। न इदमतेज्ञाततान्नूपलिंगज्ञानस्य प्रामाण्यसंशयान्न तन्निश्चय इति तदाह का
परंपराप्रामाण्यानुसरणेऽप्यनवस्थेत्याह· तर्कमिति· सापीति· मायालिंगिनि रुटिति परिव्राजकबुद्धिवदप्रमापि प्रमेत्येव गृह्यत इत्यर्थः। क
२ लमुखीमनवस्थामाह· तर्हीति· यदनुपलंभ इति· यस्य विशेषस्य शुक्तित्वादेरनुपलंभे शुक्तौ रजतभ्रमो यस्य शुक्तित्वादेरुपलंभे भ्रमो वा बाध्य व तिष्ठ ए
ते स लोकसिद्ध इत्यर्थः। यद्यपि यदुपलंभ इति वक्तुमुचितं तथापि वस्तुगत्या विशेषस्य ज्ञानं न भ्रमविरोधि अपि तु विशेषत्वेनेति दर्शयितुं यादृगित्यु
१ क्तं। एवमनभ्युपगमे लोकव्यवहारविरोध इत्याह। अन्यथेति· साभ्रमबाधव्यवस्था· बाधकस्य च पतितारिजातीयत्वबाध्यबाधकयोरविशेषाद्बाध
कत्वमेव न स्यादित्यर्थः। आश्रयो लोकमर्यादातिक्रमे किमपि न तत्वमित्यस्याप्यतत्वे बाध्यस्यातत्वमिति· बाधकस्य तत्वं बाध्यस्यातत्वमित्युपेय
मिति भावः। तथात्वेवेति। यदि नियामकनिःशेषविशेषोपलंभेपि विपरीतारोपः स्यात्तदा तद्दातस्यारोपत्वं न तावद्बाधकं विना निश्चेयं सर्व

भावे ति२

स्यानोपपत्तेः संगात्रवाधकान्तर्निश्चयेबाधकाभिमतस्यापिबाध्यतायामबाधकत्वप्रसंगात् अबाध्यत्वेतु कथमशेषविशेषोपलंभे समारोपसं
भव इति भावः। पूर्ववत्प्रामाण्यस्यानुमेयत्वं वक्तुं विनष्टध्यायायास्तस्याप्यपरिग्रहीतप्रामाण्यं न प्रवर्त्तकं तस्यप्रामाण्यानुमितेः प्रागेव नाशात् कि
न्तु तज्ज्ञानसमानविषयमप्रामाण्यशंकानास्कंदितं ज्ञानान्तरमेव। न चैवं प्रामाण्यानुमितिरफला तां विना तत्समानविषयज्ञाने अप्रामाण्यसंशयादि
तिसारी। अथ सुसवक्तृकशब्दप्रामाण्यस्योत्पत्तौ ज्ञप्तौ वा परतस्त्वे वेदेतु नित्यतया वक्तुरभावात्तद्गुणाधीनं प्रामाण्यं तु निरपितस्याप्रामाण्यं विना
पि महाजनपरिग्रहादेव स्यादित्याशंक्याह। स्यादेतदिति। सर्गप्रलयसंभवाद्वेदस्य न नित्यत्वं महाजनपरिग्रहात्तत्त्वं वा सिद्धमित्याह। उत्पत्स्यति
यद्यपि वर्णानां नित्यत्वे पूर्वप्रत्ययानुकूलानित्यानुमानवीविशेषघटितत्वेन वेदस्यापि नित्यत्वमेवेति तत्र वक्तृगुणापेक्षा स्यादेव तथापि वर्णानां नित्यत्व
व्युत्पादितनसमूहविशेषवाक्यविशेषरूपस्य तस्य सुतरामनित्यत्वं सिध्यतीत्याशयेन वर्णमात्रस्यानित्यत्वं साधयति। तथाहीति। अनभि
व्यक्तवर्णत्वव्याप्यजातिविशेषो वर्णसमूहरूपवकोलाहलः। उत्पन्नमेव वर्णस्यानित्यत्वं योगपद्यानुपलब्धेः उत्पन्नप्रतियोगिकाभावत्वेनैव

कुण्वर्द्ध घटाभावस्यैवतद्भावस्यप्रत्यक्षत्वादित्यर्थः।प्रत्यक्षस्याग्रथासिद्धिंनिराकरोति।नहीति।येन्द्रेणसन्नपिनोपलभ्यतइत्यर्थः।ततएवामूर्त्त

त्वादेवइंद्रियसंबंधविच्छेदःश्यावराणांसर्वशब्दस्यविभुत्वाद्वाकाशविशेषगुणत्वेवश्रोत्रसमवायनित्यत्वाद्युक्तइत्यर्थः।तकल्प्यमिति।श्रोत्रेंद्रियश

10 ब्दोपलंभककल्पनेत्यर्थः।नचप्रतियोगियोग्यतैवनाभावप्रत्यक्षत्वेतंत्रंकिंत्वधिकरणायोग्यतापिसाचशब्दध्वंसेनास्तीतिकथंसप्रत्यक्षःश्रो १०

त्रेंद्रियविशेषणतयाकस्यचिद्गृह्यः।अपितुसंइंद्रियसंबद्धविशेषणतयेत्यतआह।एवेति।वृत्ति।विवादेति।श्रूयमाणशब्दध्वंसइत्यर्थः।अतोनं

त्यशब्दध्वंसेनागमासिद्धिः।तस्यमाश्रंकारकालेनाशादितिभावः।ऐंद्रियकप्रतियोगिकाभावत्वादित्यर्थः।नचेदंमूर्त्तत्वाभावेनानेकांतिकं

मूर्त्तलस्यापिमूर्त्तत्वंप्रत्यक्षंयत्किंचिन्मूर्त्तयद्यपितद्भवान्।तदभावस्तुनप्रत्यक्षः।अयोग्यस्यापिमूर्त्तस्यसंभवेयावद्विशेषाभावाप्रत्यक्षतयामू

र्त्तसामान्याभावस्याप्रत्यक्षत्वात्।नचप्रत्यक्षाशेषमूर्त्ताभावग्राहिणाप्रत्यक्षेणाप्रत्यक्षेतरमूर्त्ताभावनिश्चयसहकारिणासोपिगृह्यतए

वेतिवाच्यं।लिंगवत्वाद्वागमसहकारिणापक्षयान्हकप्रत्यक्षेणोवलैंगिकवत्वावागमादनुमानमात्रविलयापत्तेः।मेवंमूर्त्तत्वसामान्यस्यया

ऐन्द्रियकेति४

ग्यायोग्यघटितत्वेनायोग्यतया तदभावे हेतोरभावात्। येन रूपेण। प्रतियोगियोग्यता तेनैव तदभावस्य योग्यतावगमात्र अत्राभावपदे न ध्वंसत्र
क्ष इति न व्यभिचार इत्येके द्रव्यनिष्ठमूर्त्तत्वाभावस्याप्रत्यक्षत्वेपि गुणादेः सप्रत्यक्षप्रवृत्तेश्च।। उपाध्युद्भावनमिति व्यतिरेकोऽतिशेते। तेनेंद्रि
यसंनिकृष्टत्वमैंद्रियकाधारत्वोपाधिरित्यर्थः। न चैंद्रियकाधारत्वं नोपाधिः। धर्माभावस्य प्रत्यक्षतापत्तेरिति वाच्यं उपाधेरधिकादेशत्वेपि दू
षकताबीजसाध्यव्यापकतानपायात्। अथ नायमुपाधिः व्यतिरेकोपसंहारसामर्थ्याभावात् तथा हि अभावत्वे सत्यतींद्रियाधारत्वादिति य
द्यपि नैंद्रियकाधारत्वव्यतिरेकउभयाधारत्वेप्यविरोधात् तथापि अभावत्वे सत्यैंद्रियकानाधारत्वादिति संभवति। किं तु योग्यताविरहः स चोपा
धिः। न च साधनव्यापकत्वं न सत्यतींद्रियाधारत्वमेव योग्यताविरहः। पृथिवीत्वात्यन्ताभावादेरयोग्यतापत्तेः। अथैंद्रियकाधारत्वाभावः सः। तथा
सति तदभावस्य योग्यतात्मकत्वे धर्माभावस्यायोग्यतापत्तेः। मैवं। ऐंद्रियकाभावमत्र नाद्याभावस्य योग्यते तूक्तो साधनव्यापकतायाश्चापरि
हारादिति भावः। व्यापकेति। प्रत्यक्षत्वव्यापकं ऐंद्रियकाधारत्वं इंद्रियसंनिकर्षानुपलब्धोत्पर्थः। यद्यपि शब्दध्वंसो न प्रत्यक्षः अतींद्रियाधारत्वात्

कु० वई दितिपृथिवीत्वादेर्व्यभिचारिः तथाप्यैंद्रियकानाधारात्माभावत्वादिति देवदत्तकर्तृत्वं तत्र प्रथममुपाधिं निरस्यति स्वरूपेति स्वरूपयोग्यतां प्र
त्यक्षापदिति स्वरूपसंपत्तिं प्रतिसहकारियोग्यतायाः सत्त्वेऽपीन्द्रियसंनिकर्षस्यानुपाधित्वात् कुतः तस्याइति तस्याः प्रत्यक्षतायाः सामिंद्रि
यसंनिकर्षरूपसहकारियोग्यतामित्यर्थः। तथा च पक्षवृत्तित्वेन साधनव्यापकत्वान्नोपाधिरिति भावः। यद्वा स्वरूपयोग्यतां स्वरूपं साध्यं प्र
तिसहकारियोग्यता नोपाधिः साध्याव्यापकत्वादित्यर्थः द्वितीयमुपाधिं निरस्यति। नापीति। यद्यप्युपाधौ सत्यपि साध्याभावो न दोषः त ११
थापि समव्याप्तोपाधिमभिप्रेत्योक्तं। विषमव्याप्तोपाधिपक्षे त्वणुकेसाध्याद्यो व्याव्यापकत्वं हृदात्माभावत्व पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेन तु
मेष्टा अयङ्कस्यात्माभावे साध्याव्यापकत्वं। किं च प्रत्यक्षयोग्यतात्वसाध्याप्रात्माभावाभावस्यात्रैंद्रियकाधारत्वमात्रं धर्माभावस्य प्रत्यक्षतापत्तेः।
नाप्यैंद्रियकाधारत्वे सत्यैंद्रियकप्रतियोगिकाभावत्वं गौरवात् नन्वतदिंद्रियग्राह्येप्यधिकरणे गंधरसाभावयोर्घ्राणादिना ग्रहात्। नन्वैंद्रिय
कत्वं प्रतियोगिकाभावत्वस्य योग्यतात्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यादिति वाच्यं। तस्याश्रयनाशजन्यस्य ग्राहकेंद्रियसंनिकर्षाभावा

सि२ दा३

दिति भावः। अत एवेति। इंद्रियसंनिकृष्टत्वमिंद्रियकाद्याराद्धं वेत्पुनर्यं तत्प्रयुक्तमपि नाभावस्य प्रत्यक्षत्वं। धर्मादिना वस्य प्रत्यक्षतापत्तेरि
त्यर्थः। स्मृतिपक्षद्वये प्रथमस्याद्धिमाह। नापीति। ननु स्वाप्यनानुमाने योग्यत्वे साध्ये प्रत्यनुमाने तदभावः साध्यः न त्रवेंद्रियासंनिकृष्ट
त्वं च नित्यत्वरिच्छासंनिकृष्टेपि योग्यताया अनपायात्। तस्मादुपेक्षा ज्ञानाकारा विषयत्वं साध्यं तदा फलाभावे योग्यताया अर्थेतित ज्ञासिद्धेरु
क्तत्वात्। ननु विशेषणतात्वमभावस्य तद्दास्यादिश्रोत्रे शब्दध्वंसे नास्ति। नैवं श्रोत्रस्यानिंद्रियत्वात् तेन न शब्दध्वंसस्य तद्विशेषणतात्वं स्वस
बंधेन विशेषणत्वाद्दृष्टत्वं च ध्वजनकत्वात्। नापि श्रोत्रे विशेषणतयादृष्टत्वं बुद्धिविषयस्य ज्ञानाभावादित्याह। विशेष्यस्येति। श्रोत्रस्यानिंद्रियत्वेपिश
ब्दलिंगकशब्दज्ञानसहकारिमनःप्रसूतानुमितिविषयत्वं स्यादित्यभिप्रेत्याह। तथेति। विशेषणतातासदंशस्य विशिष्टज्ञानं फलं। ननु तदंश
भावे विशेषणत्वमस्त्वित्यर्थः। आत्माश्रयमेवाह। विशेषणतात्वेनेति। तथापि संबंधं विना कथं विशेषणतात्वमित्युपसंहरन्नेव निराकरोति। तस्मा
दिति। संबंधांतरं विना विशिष्टप्रत्ययजननयोग्यत्वमेव स्वरूपसंबंधोऽस्ति इत्यर्थः। तथापि कथं विशेषणतात्वमत आह। सैवेति। अ

तियोगीति। प्रतियोगिनः शब्दस्याधिकरणे श्रोत्रे सत्त्वशब्दाभावस्य संनिकृष्टत्वादित्यर्थः। तथापीति। तथा विशेषणतया संनिक
र्षेण तथैव विशेषणविशिष्टविशेष्यविषयैव बुद्धिः कर्त्तव्या विशेष्यस्य श्रोत्रस्यायोग्यतया सा त्र न संभवतीत्यर्थः। गृह्यमाणेति तद्वि
शेष्यकप्रत्यक्षे तद्योग्यता प्रयोजिका अत्र तु विशेष्यं श्रोत्रमयोग्यमतो विशेष्यमविषयीकृत्यापि विशेषणतया प्रत्यासत्त्या शब्दध्वंसप्रत्य
क्षं जन्यत इत्यर्थः। अन्यथेति। यदि नैवं तदा आश्रयेऽगृह्यमाणे रूपादि प्रत्यक्षदर्शनात् गृह्यमाणे वायावाश्रये तत्स्पर्शप्रत्यक्षं न स्यादित्यर्थः। त
थापीति संबंधान्तरं विना विशिष्टप्रत्यक्षजननयोग्यतेंद्रियप्रत्यासत्त्या संबद्धविशेषणस्यैव प्रत्यक्षज्ञानजननदर्शनान्नेंद्रियविशेष
णता प्रत्यासत्तिरित्यर्थः। अस्येति। इंद्रियसंनिकृष्टोऽर्थो घटादिः तस्य प्रतिसंबंधी द्वितीयः स तथेति। न विशेषणतामात्रमेवं अपि तु गृह्य
माणविशेष्यसाक्षात्संबंधाभाववत्त्वे परंपरासंबंधः आश्रीयते। अत्र तु साक्षादेव संबंधोऽस्तीति न तदाश्रयणमित्यर्थः। द्वितीयसत्त्वेति
पक्षं निरस्यति। नापीति शब्दे न व्यभिचारवारणार्थं अभावत्वे सतीति। तथा वायावपि सत्त्वे नानुपलब्धत्वादित्यर्थः॥ ननु स्थापनानुमानेऽयो
योग्यतेति।

ग्यतायाः साध्यत्वात्प्रत्यनुमाने तदभावः साध्य इति स एव तत्रोपाधिः साधनव्यापकत्वादन्यथा नित्यानुमाने साध्याविशेषप्रसंगात् । न च योग्य
तावच्छेदकरूपाभावरूपोपाधिः । योग्यतासाधके स्थापनानुमाने नैन्द्रियकाभावत्वमेव योग्यत्वं हेतुः साध्याविशेषप्रसंगात् । अपि तु योग्यतावच्छेद
कत्वरूपाभावरूपोपाधिः । योग्यतासाधके स्थापनानुमाने नैन्द्रियकाभावत्वमेव योग्यत्वं हेतुः साध्याविशेषप्रसंगात् । न च योग्यतावच्छेदकरू
पाभावरूपोपाधिः । योग्यतासाधके स्थापनानुमाने नैन्द्रियकाभावत्वमेव योग्यत्वं हेतुः साध्याविशेषप्रसंगात् । अपि तु योग्यतावच्छेदकत्वरूप
रूपवत्त्वमिति तदभावो नोपाधिः । सर्वसाध्यव्यतिरेकत्वाश्रमेवं साध्यप्रयोजकत्वेन तादृशस्याप्युपाधित्वात् । न चैवं सत्प्रतिपक्षोच्छेदः स्थाप
नायाप्रत्यासत्त्वं तत्र सर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् । यथाशब्दो । नित्यागुणत्वादित्यत्र व्योमैकगुणत्वेन सत्प्र
तिपक्षत्वे । नागुणत्वमुपाधिः । जलपरमाणुरूपादौ साध्याव्यापकत्वात् । सर्वं योग्यता विशेषोऽस्तु रत्नयोग्यतामात्रव्यतिरेकत्वपाधिरित्य
न्यप्रयोजकत्वमेवाह न चेति । न दृश्याधारत्वमात्रं योग्यता । किन्तु दृश्यप्रतियोगित्वसतीति । न चैवं घटादिध्वंसस्याप्रत्यक्षत्वं तत्राह दृश्येति । त

कि

नोदयेति॰

कु॰ वर्द्ध द्विरष्टत्वेनोपाधिः। साध्यव्यापकत्वात्॥ नाप्युक्तयुक्त्या साध्यप्रयोजकत्वेनाप्रयोजकत्वं। ऐन्द्रियकत्वरूपसाध्यसामान्याव्यापकत्वेनानुपा
धित्वादिति भावः। विपक्षबाधकमाह अथेति यद्युक्ता संप्रत्यक्षाभ्याम् अभावाभावः प्रत्यक्ष इत्यर्थः। ननु भूतलमात्रमत्राधारस्तच्च दृश्यमेवेत्य
13 तत्राह संयोगादीति। न चात्र मानाभावः। घटनिषेधे हि भूतले घटाभावो न प्रागभावध्वंसात्मकः प्रतियोगिसमानकालत्वात्॥ नाप्यत्य
न्ताभावः कदाचिदप्युत्पन्नत्वाभावात्। तस्माद्घटसंयोगो निषिध्यते स च यः संयोग एतत्र घटस्य तत्र भावी तस्य प्रागभावोऽतीतस्य ध्वंसः स १२
र्वदेवाभवतश्चात्यन्ताभावः। ननु भूतले घटो नास्तीति घटप्रतियोगिकाभावोऽनुभूयते। संयोगस्य तु प्रतियोगित्वे संयोगो नास्तीत्यनु
भवापत्तिः। मैवं। घटो नास्तीति बुद्धेरपि संयोगाभावविषयत्वात्। तथा हि भूतले घटोऽस्तीति बुद्धिस्तत्संयोगेन। तथा तदभावेन घटाभावबुद्धिः।
यत्संबंधपुरस्कारेणात्र सत्ताबुद्धिस्तदभावपुरस्कारेणात्र तत्र नास्तिताप्रतीतिः। किं तु घटात्यन्ताभाव एव तद्विषयः। उत्पादविनाशा
धारस्तु तत्संबंधास्तथा च प्रयुक्ता। सदातनसंयोगध्वंसरूपा नैवं घटात्यन्ताभावसंबंधस्य संयोगध्वंसरूपतया नित्यत्वात् घटधीस्तत्र कदापि

नस्यादितिवाच्यं। न हि यत्र यत्संयोगोऽस्ति तत्र तत्संयोगध्वंसः। सामान्यध्वंसस्य प्रागभावादिशेषध्वंसस्याप्यत्वादेकविशेषवति सामान्यध्वंसस्य
भाववत्तदुपपत्तेरित्याहुः। यथा प्रतियोगिभेदेनाभावभेदस्तथा तदवच्छेदकभेदेनापीति संयुक्तघटस्याभावस्तत्र सवाच्यविशिष्टाभाववदुत्प
दविनाशशीलोऽन्य एवोत्पद्यते। यथाऽनादिसंसर्गाभाववैधर्म्यप्रध्वंसाभाववदुद्धरन्नथ्यथासिद्धत्वादुत्पादशीलो ध्वंसः स्वीकृतस्तथा तत एवोत्पादवि
विनाशशीलस्तुरीयः संसर्गाभावो घटस्यैतत्परं। ननु घटसंयोगाभावो योग्यानुपलब्ध्या ग्राह्यः स च प्रतियोगितद्व्याप्यतरयोर्वत्त्वानुपलंभ न
कस्य चैत्तानुपलब्धिः अत्र च संयोगस्योपलंभको घट एव नास्तीति न संयोगाभावः प्रत्यक्षः। एवं योग्यानुपलंभः प्रतियोगिसत्त्वविरोधी स एवाभा
वग्राहकः। अत एव पृथिव्यां शब्दाभावो जलपरमाणुषु न प्रत्यक्षः। प्रत्यक्षश्च वायोरूपाभावो रूपस्य महति वायौ सत्त्वेऽनुपलंभविरोधात्। एवं च
शब्दाभावप्रत्यक्षेऽपि प्रकृतेऽस्तीति शब्दाभावः प्रत्यक्ष इति भावः। कथमिति। अन्यथेत्यत्र कोऽन्यः प्रकार इत्यर्थः। ननु संयोगाभावप्रतीतौ संनि
कर्षमात्रार्थं भूतलस्योपयोगो घटतदभाववद्बोद्धव्य यद्वैवनियमेन भूतलोपलंभो न स्यात्। अतः संनिकर्षवदस्योपलब्धिरभावप्रत्यक्षाङ्ग
स्यो।

कु॰ वर्द्ध गमित्युपलब्धेः सत्त्वामेव संनिकर्ष इत्यत्राह न चेति अत्रोपलब्धेनेत्यत्रेन्द्रियसंनिकर्षे भूतलोपलंभस्य अस्मिन्सतीन्द्रियसंनिकर्ष इतीत
रतराश्रयत्वं उपलभ्यमानेनेत्यत्र यद्युपलब्धिसंबंधिनेत्यर्थस्तदा पूर्ववदितरेतराश्रयत्वं यदि तु संनिहितोपलंभकारणेनेत्यभिमतं तदैकस
15 मग्री प्रसूतत्वे नान्यनिवारणेनाभाव प्रतीत्योर्गत्वमवर्जनीयं संनिधेस्तथासिद्धत्वादित्याह तस्मादिति न च शब्दध्वंसग्रहेऽपि शब्दनिरूपणा १५
र्थमाधानग्रहस्योपयोगाद्इत्याह प्रकृते चेति तस्य शब्दस्य संयोगवदिति व्यतिरेकदृष्टान्तः तस्माद्वस्येति शब्दध्वंसस्य प्रतियोगिदेशाकाशे विश
ष्याणत्वादित्यर्थः न वेदेवाग्रिमिति यद्यपि योग्यप्रतियोगिमात्रं नानाभावयोग्यतावच्छेदकमित्यर्थः शब्दस्येवेति शब्दं प्रति कृत्ययदि ध्वंसवत्वं
सः ध्वनः तदा शब्दसत्त्वकालेऽनुपलभ्यमानत्वहेतुरन्यथासिद्धः तदसत्त्वकालेऽनुपलम्भान्नावपि साध्यस्य ध्वंसवत्त्वस्य तत्राप्यवाधित वि
यत्वेवाद् नाप्यन्यधर्मत्वादित्यर्थः ननु ध्वंसप्रतियोगित्वसाध्ये नवाह इत्यत आह अनित्यत्वेति यदा कदाचिद्ध्वंससिद्धावर्थान्तरत्वादित्यर्थः॥
कालपक्षेऽपीति तद्देशत्ववाशब्दसत्त्वकालेपि तद्वच्छेदया कालस्यानुपलभ्यमानत्वादित्यर्थः शब्दोपलब्धीति सर्वोपलब्धेन शब्दो विशेष

यागीयः । तेन ध्वंसः सिध्यति । पश्चादुत्क्रमपि सर्वं स्फुटयति । वधिरस्येति । शब्दोपलंभकादृष्टविशिष्टकर्णशष्कुल्यवच्छिन्ननभः श्रोत्रं व
धिरस्य नास्तीत्यर्थः । ननु वादृष्टविशेषः शब्दोपलब्धौ सहकारी न तत्र घटादि तं श्रोत्रमित्यत्र दृष्टान्तस्य साध्यवैकल्यं विद्यते ।। ति । तथैव स्यापि
ति । श्रोत्रस्यादृष्टघटितत्वसंशयेपि न साध्यसिद्धिरिति भावः । ननु वधिरश्रोत्रे शब्दोत्पत्तौ नानुपमुत्पत्तौ पन्नायां मावाच्छब्दानास्तीत्याह । आ
नुपलंभयोग्यस्येति । आद्यादिशब्दानामनुपलंभयोग्यानामनुपलंभयोग्यत्वमनैकान्तिकमित्याह । आद्यादीति । उपलंभयोग्यशब्दान्तरारंभकत्वेनप
रंपरयोपलंभयोग्यत्वं तेषां । प्रकृतस्य शब्दान्तराजनकतया न तथात्वमित्याह । तथात्वमिति । प्रकृतस्याप्युत्पादकत्वेनाप्यत्वात्सिद्ध्यानुपलंभयोग्य
त्वासिद्धिरित्याह । अनुपलब्धेति । प्रत्युत वधिरश्रोत्रस्य शब्दसद्भाव एव मानैसीत्याह । विवादेति । यदा तद्देशवासिनिः श्रोत्रवद्भिरुपलभ्य
ते शब्दस्तदेत्यर्थः । धर्मिज्ञानं पक्षीकृत्य शब्दध्वंसानुमानमाह । तीति । शब्दा इति एकज्ञानसंसर्गयोग्यत्वमात्रं घटादौ व्यभिचारीति नियमे मै
न तथात्वं वाच्यं तथा वासिद्धिरित्याह । एकज्ञानेति । शब्देनासमानेनुपनीतो वी ।।।। दिरपि नासत्वेति तत्सिद्धिरित्याह । अर्णिनि मानेति ।। तिः

म३ ३१

कु० वद्दी
15

वृत्तादिति। शब्दध्वंसवन्न इति साध्यं शब्दसमवायित्वरहिताइ तिवाभोनाद्योवाद्यादित्याह। तथापीति अतद्देशत्वाद्वी।।।। यदेशत्वादित्य
र्थः। ध्वंसस्य प्रतियोगिसमानदेशत्वात् अत्रापि नियमे नैकज्ञानसंसर्गयोग्यत्वमसिद्धमिति भावः। अंत्ये नियतकालप्रतीत्यनुपपत्तिरि
त्याह। आत्मं नैति सिद्धसाधनं वद्रश्व्यर्थं प्रवमन्यान्यान्नावेपि साध्य इति वाच्यं। उपाधेः विधिनिषेधयोरुपाधिमतिमन्नवत इति वी।।।दि द
शवमेव शब्दध्वंसस्येति शंकते। स्यादेतदिति। उपाधिरवच्छेदकः। यद्यपि शरीरं गंधविधौ विभुत्वनिषेधे वात्मनि तौ न न वत इति नायं नि १५
यमः। तथापि घटवच्छेदेन यद्दत्तं ते तत्रावच्छेदके विधिनिषेधयोरेव वृत्तिविधिनिषेधविषयेति नियम इति भावः। उपनीतशरीरावच्छे
छेदेनात्मनि योग्यसुखादिग्रहेपि नाकाशशब्दाभाव ग्रहः। उपाधिमतोपि तस्यायोग्यत्वादिति परिहरति। तत्रेति। नैरिति। वीणादय
प्रत्यक्षा अपि न शब्दसमवायिन इति न तेः शब्दध्वंसो निरूप्य इत्यर्थः। निरूपणेति। तथा च विवादाभावो दृश्यविरत्वदृश्यप्रतियोगि
त्वयोः संभवादित्यर्थः। ध्रुवा।।। अनरमाद्दनवैव मिति मुख्यप्रतियोग्यपार्व्याप्यरवियएवाभावनिरूपकत्वादित्यर्थः। यादि वमुख्यामुख्यसा

धाराणामाधारमात्रंतन्निरूपकमन्नाह। नवेति अप्रत्यक्षेवीणादौशब्दाभावप्रतीत्यनुदयापत्तेरित्यर्थः। ध्वंसदितिवीणादौशब्दविशेषानुमि
तशब्दध्वंसव्यवहारआनुमानिकःस्यादित्याह। आनुमानेनि केरितिअश्रोत्रत्वेनसशब्दापिवीणानश्रोत्रेणोपलभ्यत इति व्यभिचारइत्याश
ङ्कतारितिसंदिग्धेतियत्रशब्दविशेषाणामनुमितावीणानप्रत्यक्षातत्रवीणायाःसत्वासत्वसंदेहादित्यर्थः। यद्यपिपक्षस्यलिंगविशिष्टज्ञान
देवानुमितिसंभवेसंदेहानानुमितिविरोधीतथापिप्रथमंवीणाध्वंसंसंदेहाच्छब्दध्वंससन्नत्रवर्त्ततइतिधीर्नस्यात्। यद्वाध्वंवीणाद्यनुमानपक्ष १८
निश्चयादनुमानाभावेपिशब्दस्यानुपलंभादभावनिश्चयादित्येवपरोयंग्रंथः। शब्दवत्तयानुपलभ्यमानेत्वसत्युपलभ्यमानत्वादितिहेतू
करणान्नदृष्टान्तइत्याह। अनुपलभ्यमानेतिप्रसिद्धेःनुपलभ्यमानत्वस्यातिशेषः। तत्रहेतुमाह संदिह्यतेति। साध्यलिंगस्येति। शब्दरूपलिंगस्यासत्वेत्यर्थः।
आश्रयापदेशस्यवाभावादितिभावः। ननुशब्दएतत्कालध्वंसप्रतियोगी एतत्पूर्वकालत्वेसति शब्दत्वाद्यावत्तदुपलंभकसत्वेप्यनुपलभ्यमा
नत्वादित्यनुमेयं एवंसतिघटाभावस्याप्यनुमेयताया मन्नावस्याप्रत्यक्षत्वापत्तेः। यदियोग्यानुपलब्धिः सन्नस्त्वात्पक्षे वहेतुत्वाद्वानुमा

न॰

दि ३

कु॰वृ॰ न्तर्दिप्रकृतेपितुल्यमिति भावः। अपिवेति। यदिप्रतियोग्याश्रयेणोवा भावोनिरूप्य तदितिशेषः। तुल्यन्यायेनेति ध्वंसत्रूपकालाकाशप
ह्ने आश्रयासिध्यनेकान्तिकत्वात्। पटतदवयवादिपक्षेबाधाद्दित्यादिनेत्यर्थः। तंतुष्विति पटारंभकतंतुष्वित्यर्थः। प्रागुक्तदोषात्। प्रिया
16 पटध्वंसविशिष्टतंतुध्वंसवत्वं मंतुष्वसाध्यमाशंक्य प्रकारांतरेणावाधसिद्धसाधने आह यद्वेति तद्वृत्तीनां पटध्वंसवत्त्वं। नन्वेतं शंक
पटध्वंससमानकालस्यजन्यतंतुध्वंसवत्त्वः तद्वृत्तित्वघटानुपलम्भमानत्वादित्यनुमानं स्यात्। अत्रयदाकदाचिदसमानकालत्वविवक्षायामिद्ध १६
नीतपदद्वृत्तिप्रतीत्यनुपपत्तिः। अथेदानीं तथात्वे तदा हेतोरसिद्धिरित्यपेके यत्र परंपरापि नोपलभ्यते तत्र कथमनुमानमित्यत आह। मनुष
त्वविशिष्टनिषेधे विशेष्यसिद्धौ मानत्वेनैव तस्य विशेषणाभावमात्रपर्यवसायित्वात् प्रकृते वा तथात्वात्। गुणक्रियापदमवारतंतुनिषेधे गुणाक
र्मपदानामपिनिषेधः स्यादितिशंकते। अतएवेति। अत्रापिवाचकपदं संनिधेत्पर्ययं परिहरति। तथापीति। तस्येति पटध्वंसस्यारंभकनाधार
त्वादित्यर्थः। आश्रयेति गुणक्रियापदाशयं तंतुघटदिकानामंतरानामपि गुणादिदेशत्वमित्यर्थः। तं विनाशयेति। तं प्रतियोगिनं तंतवध्याप्य

चेति वै द्रूप्यंशब्दस्य तु नाश्रयग्रहणं विनग्रहणसामग्रीयेनतद्ग्रहेनष्ट इतेति भावः। यत्रेति एतेन निरवच्छिकरणानाभावधीरिति सर्वं
किन्तु प्रतियोगिसमवायि देश निरूप्यता नियमो नास्तीत्युक्तं नन्वेवं प्राङ्गस्थितायामप्यनुपलंभेनानुमानं न स्यादित्यत आह द्रव्यांस्थिति। प्र
त्यक्षसामग्र्याःसती त्वंयोग्यानुपलंभसहकृतत्वं यत्र तु प्राङ्गस्थितादाववाधारेंद्रियसंनिकर्षाभावा तद्भावस्य सासती ज्ञानाये दनुमानमे
न स्मरणार्हस्य स्मरणादिना। आदि ग्रहणान्नाप्तोपदेशमात्रादी त्यर्थः। स्थितिर्थ वस्थितिः आमाशीकत्वात्। शास्त्रस्य विशेषविषयत्वान्न हि
रोधोपि नास्तीत्याह। एतेनेति। सङ्ख्यां प्रतियोग्यधिकरणाभ्यां विशेषविषयत्वमेवाह। नन्वेति उभाभ्यां संयोगिन्यां संयोगो निरूप्यतइ
ति तदभावोपि तथेत्यर्थः। अनुमानेति यत्र व्यापकाभावे नव्याप्याभावो नुमीयते तत्राश्रययहणमपयुक्तमित्यर्थः। अन्यथेति। तत्राश्र
याग्रह इत्यर्थः। तथापीति। उभय निरूप्य प्रतियोगि विषयेपि नाउ नव नियमः। स्मरणो नाप्याश्रय निरूपणानां इवा ह्वेत्यर्थः॥ य
त्तु क्वचिद् घटं नूतलमित्य त्राग्रहणान्नियमः सोप्यन्यथा सिद्ध इत्याह। क्वचिदिति। आश्रयग्रहणानियमश्च न सूत्रकारस्यापि सं

नापीति १

कु॰ वर्द्ध॰ मत इत्याह। यदि वेति दृष्टान्तस्य वह्निनाशस्याज्ञानादित्यर्थः। असिद्धिमेव व्युत्पादयति। नहीति हेतोरेवेति अनुपलभ्यमानत्वादित्यस्य
हेतोरभावात्। अथाश्रयासिद्धेरपक्षधर्मतया येन रूपेणाहेतुत्वं तेनानिरूपणादित्यर्थः। वह्निनिमित्तं इन्धननाशस्य प्रत्यक्षत्वान्नमीतान्यत्र प्रतियो
17 गिगमनाभावः स्यात् प्रध्वंसस्येति सर्वमित्यर्थः॥ तस्येति निमित्तनाशेऽपि नैमित्तिकानाशादित्यर्थः। तत्रसेति। निमित्तनाशे यन्निश्यतीति व्याप्ते
रित्यर्थः। गमनं प्रतियोगिनः। निमित्तादिनेति अत एव यत्र कपालादिपरंपरानाशेऽपीहन्तु तत्र घटो नास्तीति धीः समर्थिता। अत एवेति। य १७
त एव निमित्तादिना देशेन ध्वंसानिरूपणमित्यर्थः। अथ व्याख्यालोकावयवानामनिरूपणादवयविनाशात्मकं तमोऽन प्रत्यक्षं स्यादिति न
वा। एतेनेति। प्रतियोगियोग्यतामात्रनिरूप्यत्वेन व्याख्यानतः प्रत्यक्षतया। एतच्च संसर्गाभावविषयं अन्योन्याभावस्यायोग्यप्रतियोगि
कस्यापि प्रत्यक्षत्वात्। कथमन्यथा स्तंभः पिशाचो नेति धीः प्रत्यक्षा। प्रतियोगिसत्त्वविरोधिन एवानुपलंभस्याभावप्रवृत्तायां तत्र चात्र
यदि हि स्तंभः पिशाचः स्यात् स्तंभात्मकतयोपलभ्येतेति। नि पिशाचानुपलंभः स्यात्। ननु शशाभावो न योग्यानुपलंभग्राह्यः तत्राप्येतर

तदुपलंभकस्याभावायोग्यत्वाभावात् तथा च सतएव शब्दस्य व्यंजकवायुविरहादनुपलब्धिमात्रं न तु तस्य ध्वंसग्रहः विनष्टैरपि व्यंज
कवायुध्वंसो प्रामाणिके वचनतएव यस्य यत्र सत्त्वमनुपलब्धिविरोधि तस्याभावस्य तत्र ग्रहइतियोग्यानुपलब्ध्यर्थपक्षेपि न शब्दाभावो ग्रा
ह्यः व्यंजकाभावे न सतोपि शब्दस्योपलब्धेरभावात् मेवम्। वर्णानां प्रतिनियतव्यंजकव्यंग्यत्वात् एकावच्छेदेन समानदेशत्वे सति समान
यग्राह्यत्वात्। घटैकत्वपरिमाणवदिति प्रतिनियतव्यंजकव्यंग्यत्वानुपपत्त्या वायोर्व्यंजकत्वनिरासात् एवमिति। प्रत्यक्षेणानित्यत्व
साधितमित्यर्थः। उत्पत्तिमत्त्वात् स्वसमानकालीनप्रतियोगिध्वंसानाधारक्षणाधारत्वादित्यर्थः। नावश्यं नविशेषणानां ध्वंसेन व्यभिचारः।
नवदमिति। यद्यपि सएवायं गकार इति प्रत्यभिज्ञाननित्यत्वं न गोचरयति। किंच भेदमात्रं तथापि नाशकत्वाभिमतशब्दानन्तरमपि स
त्त्वं गोचरयन्नित्यतामावपर्यवस्यति आश्रयनाशस्याभावादिति भावः। स्वतइति। स्वयं अप्रामाण्यशंकाविरहादिति भावः। विरुद्धे
नेति। परिमाणभेदाध्यासेनेत्यर्थः। अयं च बहुधर्मत्वस्थितिः। शब्दं विहायेतिशेषः। तद्विरुद्धधर्मवत्त्वं तीव्रादिविरुद्धधर्मवत्त्वं तद्भिन्नाः

कु॰ वर्द्ध तीत्वाच्चादितिरूद्धधर्मिताः। चार्वाकमतमालंब्याह॥ तथापीति मीमांसकस्यतन्मतावलंबनेनुमानप्रामाण्यस्वीकारव्याघातइत्या
ह॥ एवमिति॥ नचशंकापिसंभवतीत्याह॥ नचैतदिति॥ ननुध्वनिधर्मस्तारत्वादयोगृह्यमाणाएवशब्दआरोप्यन्ते॥ नस्मर्यमाणाइत्यत्राह
नचेति॥ ध्वनयोवायवीयाएवेतितेषांचक्षुरादिनिग्रहे तद्धर्मास्तारत्वादयोनगृह्यन्तइतिनगृह्यमाणारोपइत्यर्थः॥ अग्रहेनुमाह॥ स्पर्शादि
ति॥ अवायवीयत्वेनतिश्रोत्रं नवायुमात्रधर्मग्राहकं अवायवीयवदितिरिंद्रियत्वाच्चक्षुर्वदित्यर्थः॥ अतोसमवायद्रव्यत्वग्राहकेणावक्तुमाम १८
नस्मावाय्यनिवारः॥ ननुवाप्रयोजकमिदं नहियदिंद्रियंयद्द्रव्यजातीयंतत्ताज्जातीयस्यैवधर्मंगृह्णातितेजसेनचक्षुषानीलाद्यग्रहप्रसंगात्॥ श्रो
त्रवावायत्वाच्चक्षुर्वायुमात्रवदितिरिंद्रियग्राह्यत्वादित्यर्थः॥ तेननसन्नायांव्यभिचारः॥ अवायुग्राह्येति॥ अवायुमात्रग्राह्यनचयद्वदितिरिंद्रियंयद्विशेषगु
णग्राहकं तत्तज्जातीयगुणावदेवेतिनियमेनश्रोत्रस्यवायुगुणतारत्वादिग्राहकत्वेतद्गुणवत्त्वप्रसंगात्॥ वायवीयत्वप्रसंगात् श्रावणत्वाच्चक्षुर्वायु
मात्रवदितिरिंद्रियग्राह्यत्वादित्यर्थः॥ तेननसन्नायांव्यभिचारः॥ अवायुग्राह्येति॥ अवायुमात्रग्राह्यधर्मेत्यर्थः॥ अत्रविपक्षबाधकमाह॥ यदिचे

ति॰ श्रोत्रस्य नन्नत्वमाननमाह॰ ग्राह्येति ग्राह्यजातीयविशेषणगुणा वेतत्यर्थः। ध्वनीनामिति॰ ध्वनयो नानासमवायिकारणत्वाद्गुणाः एवेत
डुर्मासारवादयः स्युः सामान्यरूपाः स्युः। तथा च ध्वनीनां तारत्वादिसमवायिव्यक्तीनामज्ञाने गगनादिगतत्वेन न नाशेरन्नित्यर्थः। नन्वेति॰ जाति
ज्ञाने व्यक्तिविषयत्वनियमादित्यर्थः। प्रत्यक्षेयं नियमो। न तो न जातिपदजन्यजातिज्ञाने व्यभिचारः। जातिपदेनापि वा जातिज्ञानं व्यक्तिविषयक
मवजन्यते। नित्यानेकव्यक्तिवृत्तित्वस्य जातित्वात्। एवन्नर्हीति। ननु परमाणुवृत्ति सत्तादिकं ग्रह्यते इत्यव्याप्तिः। न च परमाणुगतत्वेन तद्बुद्धि
राप। ग्रा॰ विशेषणज्ञानं विना विशिष्टज्ञानाभावात्॰ परमाणोश्चायोग्यत्वेनाज्ञानात्॰ न परमाणुघटितेन्द्रियसंनिकर्षात् पार्थिवान्नरवश
ह्यमाणो सत्तादिर्ग्रह्यतेत्यर्थात्॰ नव योग्यव्यक्तिसंनिकर्षात् तद्वृत्तिजातेर्योग्यव्यक्तिघटितसंनिकर्षणायम्त्वे योग्यव्यक्तिज्ञानस्यापेक्षकत्वा
त्॰ तथा चेति॰ न च स्मर्यमाणातारत्वादि घाणप॰ प्रथमतः तारत्वाद्यध्यक्षापातात् तद्बाधकाभावाद्वा। अत एव यथा जो हित स्फटिक इत्यत्र जपात्व
नाप्रतीतस्यत्वो हित्यनेव प्रतीयमानस्य जपाकुसुमस्य त्वो हित्यमारोप्यते। तथा ध्वनित्वेनाप्रतीताव पितारत्वेनैव ध्वनीनां स्फुरणांस्यादिति।

कु॰वृ॰ तिनिरस्तं गकारगतत्वबाधकाभावात् ननु तारत्वादयो न गकाराद्भिन्ना तथा गत्वादिना संकरप्रसंगात् न च नानैव तारत्वं ताराकारानुगतप्र
तीत्यनाबापत्तेः। न च गतारत्वाद्येव जातिस्तारत्वनिश्चये गत्वसंशयात् तारत्वमंदत्वे च न जाती सप्रतियोगिकत्वात् नापि तयोर्विरोधः य एव गा
१९ कारस्तारआसीत्स एवेदानीं मंद इति कालभेदेन वक्तृभेदेन तयोरेकत्र प्रतीतेः। तारत्वं मंदत्वं च यद्यप्युपाधिरस्तीति चेत् न अभेदेन धर्मिणि तान्नासमा
नविशिष्टभेदबुद्धेर्धर्मभेदविषयत्वात् पाकरक्ते घटे रक्तोयं न श्याम इति धीवत् न च तारमंदगकारयोरभिन्नत्वान्न भावकत्वाद्धयोर्भेदः न ह्य १०
ज्ञकवा यश्चारवतथात्वेन मंदस्याग्रहात्।। इति बाधकाद्देवस्मार्य मणरारोपः स्यात् अस्तु वा गृह्यमाणे एवारोपः श्रोत्रे तोवतन्द्दहात् न च तुरादिना
यत्र न वायुधर्मयः तत्रायोग्यत्वमुपाधिः अन्यथा श्रोत्रेणाश्च गुणो मगृह्येत। इंद्रियस्य स्वगुणाग्राहकत्वात् सन्तु वा तारमंदरूपा भिन्ना एव
गकारास्तु त्वत्प्रत्यभिज्ञाने बाधकाभावात्।। ।।उच्यते।। ।।शुकसारिकामनुष्यप्रभवेषु स्त्रीपुंसतद्विशेषप्रभवेषु वेणु वीणादिमाधुर्यविस्फुटत्वे ज्ञा
त्यमनुभूयते। न वेदं सोपाधिकं बाधकाभावात् न चाविकमोपपत्तिकं वा। नापि इंद्रियासंनिकर्षेणास्त्री पुंसविशेषा न नुभवे पिशब्दभेदप्रत्ययात् न य

तः श्रीपुंस प्रनवत्वमनुमिनुते। अयथार्थाव्यास्त्रयात् श्रीप्रनवत्वेज्ञाते भेदधीस्तत्त्वतदनुमानात्। नान्यस्तु पाधेरन्वयव्यतिरेकानुविधानान्ना
वाऽनवव्यंजक वायुवैजात्यं वगकाराभतत्वेनभासते। वायोश्चज्ञानं न नैवरूपाणीति वाच्यं। गकारगतत्वेवायकानां वाऽनवात्भेदप्रत्यभिज्ञानंवा
धकंयएवसुकशब्दस्सएवश्रोत्राशब्दइत्यननुभवात्। तथात्वेवाभेदज्ञानानावे नवङ्कविशेष्या ननुमानापत्तेः॥ अस्मिंश्चकोपि गकारविशेषोऽयंता
दिविशेषप्रनवत्वमनुमीयते। अयपदेश्यत्वेष्याऽनुमर्म विकल्पात्। तस्माद्गकारादौ भेदज्ञानसमानेऽनुगतबुद्धिर्गत्वादिजातिः। तारत्वमपि गत्व विषय३४
दिव्याप्यं नित्र अनुगतयवहारश्चसजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकादुपाधेस्सदृशानेवतद्व्यवहारासिद्धेः। परेरपि सुकादिगका
रादिव्यंजकवायूनां वैजात्यं वाच्यं तत्रयदि सु। कवर्णाभिव्यंजकत्वायुत्वं ककारव्यंजकवायुत्वव्याप्तं तदा सुकगकारव्यंजकवायोनस्यात्। अ
थ व्यापकस्तदा सर्व एव ककारव्यंजका वायवः सुकवर्णाभिव्यंजकाः स्युरिति वायुवृत्ति त्वेपि वैजात्यं नानैवन्तथापि यावद्बहुकल्पेदं नित्याएव
वर्णाः सन्तु तत्प्रत्यभिज्ञानेवायकाना वाऽनवात्भेवं। अस्मिदिस एवायं गकार इति प्रत्यभिज्ञानं अस्मिंश्च तत्रोत्पादविनाशधीः नवानयोरस्यार्थं वि

प्र० भ्रम

ह्यायान्याद्बाधकमस्ति। नवा नयोरेकं भ्रमः प्रकाशमन्तरं विशेषादर्शनेनापरोत्पत्त्यभावापत्तेः। ततस्तयोरवश्यं विषयभेदो वाच्यः। एकविषयत्वे
विरोधे नैकानन्तरमपरानुत्पत्त्यापत्तेः। एवं च भेदज्ञा समानभूत्वं लिङ्गानस्य तज्जातीयत्वं विषयः। न चैवं तज्जातीयोयमिति तदाकारापत्तिः। तज्जा
20 तीयविषयाया अपि बुद्धेः सोयमित्याकारदर्शनात् यथा तानेव शाली नुपर्युक्ष्मद्ध्यानेन पत्ति निरीति ति। यत्र च प्रथमं न भेदधी सत्र च प्रत्यभि
ज्ञानं व्यक्त्यभेदविषयं। तस्माद्यत्र भेदधीर्न दृष्टतरबाधकावाध्यात्त्र प्रत्यभिज्ञानमेव न भवति। भवद्यात ज्जातीयत्वमात्रमवलंवते। इत्यस्मत्पि
तृचरणाः। सत्प्रतिपक्षत्वं वस्तुतस्तु त्पवले न तत्त्वया प्रतिसंहितेन वा। नाद्य इत्याह। मिथ इति। तथात्वे वा वस्तुनो विरुद्धद्वैरूप्यापत्तिरिति भा २०
वः। अंगं पक्षसत्त्वादिस्त्रयस्य शाश्वा। नित्यत्वसाधनस्य द्वितीयं शंकते तथापीति। न केवलं प्रतिपक्षतादशायां साधनदशायामपीत्यपेरर्थः।
नन्वयं समवायिकारणाद्यस्य तदध्यं। अद्रव्यत्वाद्रूपत्वान्मानप्रागभावेनव्यभिचारः स्यादितिद्वंद्वं विशेषणां। असिद्धिरिति विशेषणाविशे
